# वर्षागीतम्

## आमुखम्

अस्मिन् पाठे वृष्टिमधिकृत्य एकां बालकवितां परिचिनोति। कविता नौकागानरूपेण रचिता। अतः नौकाकेली, नौकागानम् इत्येतेषां सामान्यपरिचयः सरलतया दातुं शक्यते। तद्द्वारा वर्षाकालस्य सूचना अपि भवति। ततश्च वृष्टेः आवश्यकता, नदीनाम् आवश्यकता, जलस्य विनियोगे श्रद्धेयाः अंशाः, समीपस्थनदीनां जलाशयानां च अवस्थायाः अनुस्मारणं, वृष्टिमधिकृत्य प्रचलिताः पुराणकथाः, वर्षकालजन्यरोगाः इत्येवमादयः चर्चारूपेण मातृभाषया अवतारयति। चर्चायां छात्राणाम् अनुभवकथनम् अपि मुख्यमेव।

पाठनाम-वर्षागीतम्

कालांशः - १३

उद्देश्यम् - संस्कृतगीतालपनेन संस्कृतभाषाश्रवणाय अवसरः।

नैपुणी - संस्कृतगानालपनसामर्थ्यम्।

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| प्रकृतिस्नेहः श्रयान्<br>वृष्ट्या एव प्राणिनां<br>जीवनाय जलं लभते।<br>वृष्टिः सर्वेषां मनसि<br>आह्लादं जनयति।<br>गीतम्, चर्चा, क्रीडा<br>पदानि लघुवाक्यानि च<br>अक्षरम् - 'व'<br>कृषिकार्यार्थं वृष्टिः आवश्यकी।<br>संस्कृतगीतालपनेन संस्कृत-<br>भाषाश्रवणाय अवसरः।<br>भाषाप्रयोगः - तरति, पिबति,<br>स्नाति, आगच्छन्तु | चर्चा- वृष्टिसंबन्धिनः विषयाः।<br>१. नूतनवृष्टेः सौन्दर्यम्।<br>२. अतिवृष्टेः अनावृष्टेश्च<br>कारणात् नाशः।<br>३. वर्षकालजन्यरोगाः।<br>४. वर्षागीतानि ......<br>इत्येते विषयाः<br>गीतालपनम्/छात्राः अनुगायन्ति।<br>लघुवाक्यानि श्रुत्वा वदति।<br>भेकस्य चित्रं वर्णैः लिम्पति।<br>पदं पूरयित्वा वर्णेन लिम्पति।<br>पशुपक्षिणां शब्द-चेष्टानुकरणं<br>अवतारयति। | संस्कृतगीतम्- श्रृणोति, आलपति।<br>नौकागानतालानुसारं<br>गीतम् आलपति।<br>लघुवाक्यानि श्रृणोति वदति च।<br>अक्षरपरिचयं प्राप्नोति।<br>वर्णलेपननैपुणी।<br>क्रियापदानि परिचिनोति।<br>वर्णानाम् उच्चारणं परिशीलयति।<br>बालकवितालपने अभिरुचिः। |

चर्चायां वृष्टिकालस्य विशेषताः अधिकृत्य मातृभाषया अध्यापकः कानिचित् कार्याणि अवतारयति। तदनन्तरं स्वानुभव कथनाय छात्रान् प्रेरयति।

**चर्चासूचिकाः -**

- नववृष्टेः सौन्दर्यम्।
- वृष्टेः आवश्यकता।
- जलस्य विनियोगः।
- वर्षाजन्यरोगाः।
- नदीनां जलाशयानां स्मारणम्।
- वृष्टिकथाः, वर्षागीतानि।
- अतिवृष्टिकारणात् नाशः।
- अनावृष्टेः दोषाः।

**प्रश्नाः**

- वर्षासमये जनाः किं किं कुर्वन्ति?
- जन्तवः किं कुर्वन्ति?
  (भेकाः, मयूराः, ........ किं कुर्वन्ति?)
- वृष्टिजलं कुत्र सम्भरति? किमर्थम्?
- वृष्टेः गुणाः?
- अनावृष्टेः अतिवृष्टेः च दोषाः के?
- अन्तरीक्षस्य विशेषाः के?

**प्रवर्तनम् १**

**कवितालपनम्**

**उद्देश्यम्-** संस्कृतकविताश्रवणाय अवसरः।

अध्यापिका कविताभागं सतालं द्वित्रवारम् आलपति। छात्रान् अनुगानाय प्रेरयति। अभिनयगीतरीत्या सङ्घे गीतम् अवतारयितुम् अध्यापिका साहाय्यं करोति।

**मूल्यनिर्णयसूचिकाः -**

सतालम् आलपनम्।

अभिनयः।

**प्रवर्तनम् २**

**वाचनम्**

**उद्देश्यम् -** संस्कृतवाक्यश्रवणाय अवसरः।

अध्यापिका पाठपुस्तकस्थानि लघुवाक्यानि उच्चैः स्पष्टतया च पठति। छात्राः अनुवदन्ति च। संस्कृतवाक्यश्रवणाय, वाचनाय च छात्राः अवसरं लभन्ते। अत्र अभिनयरूपेण, 'तरति, पिबति, स्नाति' एतानि क्रियापदानि परिचाययति।

**मूल्यनिर्णयसूचिकाः -**

स्पष्टतया वाचयति

अभिनयरूपेण अवतारयति।

**प्रवर्तनम् - ३**

**वर्णलेपनम्**

**उद्देश्यम्-** कलापठनाय अवसरः।

अध्यापिका छात्रान् भेकस्य चित्रं वर्णैः लेपनाय निर्दिशति। इष्टवर्णस्वीकाराय अवसरः देयः।

**मूल्यनिर्णयसूचिकाः -**

उचितवर्णेन लिम्पति।

आकर्षणीयता।

**प्रवर्तनम् - ४**

**अक्षरपूरणम्**

**उद्देश्यम्- अक्षरं (व)प्रत्यभिजानाति।**

अध्यापिका पदं पूर्णतया पूरणार्थं छात्रान् प्रेरयति साहाय्यं च ददाति। अनन्तरं इष्टवर्णैः लेपनार्थं प्रेरयति।

**मूल्यनिर्णयसूचिकाः**

पदं पूर्णरूपेण लिखति।

उचितवर्णेन लिम्पति।

**प्रवर्तनम्** ५

**शब्दानुकरणक्रीडा**

**उद्देश्यम्-** शब्दानुकरणाय अवसरः।

अध्यापकः छात्रान् शब्दानुकरणाय सज्जान् करोति। पशुपक्षिणां (भेकः, मयूरः, मीनः, काकः, अजः, शुनकः, कुक्कुटः इत्यादीनां) शब्दं चेष्टां च अनुकरोति। वृष्टिसमये एते जन्तवः किं कुर्वन्ति इति निरीक्ष्य तद्वत् अनुकरणाय निर्दिशतु।

**मूल्यनिर्णयसूचकाः -**

जन्तूनां नामानि प्रत्यभिजानाति।

शब्दानुकरणम्।

निरीक्षणपाटवम्।

**अनुबन्धप्रवर्तनानि -**

(क) कर्गदेन नौकानिर्माणं कर्तुं शक्यते।

(ख) अक्षरचित्ररचना- अत्र वकारेण चित्रपतङ्गस्य चित्रं निर्मातुं शक्यते।

**(अनुबन्धः -३)**

(ग) वर्षागीतम्- आगच्छत भो गायाम

वर्षागीतम् गायाम.......

गेयसंस्कृतम् - सान्द्रमुद्रिका (DPI, 2009)

Download - www.sanskritkerala.gov.in)

(घ) वर्षागीतम्- **(अनुबन्धः -५)**